श्री हरिहरपुत्र अष्टोत्तरशतनामावलिः

श्री हरिहरपुत्र अष्टोत्तरशतनामावली

अस्य श्री हरिहरपुत्राष्टोत्तरशतनामावल्यस्य ।
ब्रह्मा ऋषिः । अनुष्टुप् छंदः । श्री हरिहरपुत्रो देवता ।
ह्रीं बीजं । श्रीं शक्तिः । क्लीं कीलकं ।
श्री हरिहरपुत्र प्रीत्यर्थे जपे विनियोगः ॥

ह्रीं इत्यादिभिः षडंगन्यासः ॥

ध्यानं -
त्रिगुणितमणिपद्मं वज्रमाणिक्यदंडं
सितसुमशरपाशमिक्षुकोदंडकांडं
घृतमधुपात्रं बिभृतं हस्तपद्मैः
हरिहरसुतमीडे चक्रमंत्रात्ममूर्तिं ॥

आश्याम-कोमल-विशालतनुं विचित्र-
वासोदधानमरुणोत्पल-दामहस्तं ।
उत्तुंगरत्न-मकुटं कुटिलाग्रकेशं
शास्तारमिष्टवरदं प्रणतोऽस्ति नित्यं ॥

1। ॐ महाशास्त्रे नमः
2। ॐ विश्वशास्त्रे नमः
3। ॐ लोकशास्त्रे नमः
4। ॐ धर्मशास्त्रे नमः
5। ॐ वेदशास्त्रे नमः
6। ॐ कालशास्त्रे नमः
7। ॐ गजाधिपाय नमः
8। ॐ गजारूढाय नमः
9। ॐ गणाध्यक्षाय नमः
10। ॐ व्याघ्रारूढाय नमः
11। ॐ महाद्युतये नमः

12। ॐ गोप्त्रे नमः

13। ॐ गीर्वाणसंसेव्याय नमः

14। ॐ गतातंकाय नमः

15। ॐ गणाग्रण्ये नमः

16। ॐ ऋग्वेदरूपाय नमः

17। ॐ नक्षत्राय नमः

18। ॐ चंद्ररूपाय नमः

19। ॐ बलाहकाय नमः

20। ॐ दूर्वाश्यामाय नमः

21। ॐ महारूपाय नमः

22। ॐ क्रूरदृष्टये नमः

23। ॐ अनामयाय नमः

24। ॐ त्रिनेत्राय नमः

25। ॐ उत्पलकराय नमः

26। ॐ कालहंत्रे नमः

27। ॐ नराधिपाय नमः

28। ॐ खंडेंदुमौळितनयाय नमः

29। ॐ कल्हारकुसुमप्रियाय नमः

30। ॐ मदनाय नमः

31। ॐ माधवसुताय नमः

32। ॐ मंदारकुसुमार्चिताय नमः

33। ॐ महाबलाय नमः

34। ॐ महोत्साहाय नमः

35। ॐ महापापविनाशनाय नमः

36। ॐ महाशूराय नमः

37। ॐ महाधीराय नमः

38। ॐ महासर्पविभूषणाय नमः

39। ॐ असिहस्ताय नमः

40। ॐ शरधराय नमः

41। ॐ हालाहलधरात्मजाय नमः

42। ॐ अर्जुनेशाय नमः

43। ॐ अग्निनयनाय नमः

44। ॐ अनंगमदनातुराय नमः

45। ॐ दुष्टग्रहाधिपाय नमः

46। ॐ श्रीदाय नमः

47। ॐ शिष्टरक्षणदीक्षिताय नमः

48। ॐ कस्तूरीतिलकाय नमः

49। ॐ राजशेखराय नमः

50। ॐ राजसत्तमाय नमः

51। ॐ राजराजार्चिताय नमः

52। ॐ विष्णुपुत्राय नमः

53। ॐ वनजनाधिपाय नमः

54। ॐ वर्चस्कराय नमः

55। ॐ वररुचये नमः

56। ॐ वरदाय नमः

57। ॐ वायुवाहनाय नमः

58। ॐ वज्रकायाय नमः

59। ॐ खड्गपाणये नमः

60। ॐ वज्रहस्ताय नमः

61। ॐ बलोद्धताय नमः

62। ॐ त्रिलोकज्ञाय नमः

63। ॐ अतिबलाय नमः

64। ॐ पुष्कलाय नमः

65। ॐ वृत्तपावनाय नमः

66। ॐ पूर्णाधवाय नमः

67। ॐ पुष्कलेशाय नमः

68। ॐ पाशहस्ताय नमः

69। ॐ भयापहाय नमः

70। ॐ फट्काररूपाय नमः

71। ॐ पापघ्नाय नमः

72। ॐ पाषंडरुधिराशनाय नमः

73। ॐ पंचपांडवसंत्रात्रे नमः

74। ॐ परपंचाक्षराश्रिताय नमः

75। ॐ पंचवक्त्रसुताय नमः

76। ॐ पूज्याय नमः

77। ॐ पंडिताय नमः

78। ॐ परमेश्वराय नमः

79। ॐ भवतापप्रशमनाय नमः

80। ॐ भक्ताभीष्टप्रदायकाय नमः

81। ॐ कवये नमः

82। ॐ कवीनामधिपाय नमः

83। ॐ कृपाळवे नमः

84। ॐ क्लेशनाशनाय नमः

85। ॐ समाय नमः

86। ॐ अरूपाय नमः

87। ॐ सेनान्ये नमः

88। ॐ भक्तसंपत्प्रदायकाय नमः

89। ॐ व्याघ्रचर्मधराय नमः

90। ॐ शूलिने नमः

91। ॐ कपालिने नमः

92। ॐ वेणुवादनाय नमः

93। ॐ कंबुकंठाय नमः

94। ॐ कलरवाय नमः

95। ॐ किरीटादिविभूषणाय नमः

96। ॐ धूर्जटये नमः

97। ॐ वीरनिलयाय नमः

98। ॐ वीराय नमः

99। ॐ वीरेंदुवंदिताय नमः

100। ॐ विश्वरूपाय नमः

101। ॐ वृषपतये नमः

102। ॐ विविधार्थफलप्रदाय नमः

103। ॐ दीर्घनासाय नमः

104। ॐ महाबाहवे नमः

105। ॐ चतुर्बाहवे नमः

106। ॐ जटाधराय नमः

107। ॐ सनकादिमुनिश्रेष्ठस्तुत्याय नमः

108। ॐ हरिहरात्मजाय नमः

इति श्रीहरिहरपुत्राष्टोत्तरशतनामावलिः संपूर्णं ॥